श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुर्नवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्नवतितमः सर्गः ॥

## राक्षसीनां विलापः

तानि नागसहस्राणि सारोहाणि च वाजिनाम्।
रथानां त्वग्निवर्णानां सध्वजानां सहस्रशः॥ **6.94.1** ॥

राक्षसानां सहस्राणि गदापरिघयोधिनाम्।
काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम्॥ **6.94.2** ॥

निहतानि शरैर्दीप्तैस्तप्तकाञ्चनभूषणैः।
रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा॥ **6.94.3** ॥

दृष्ट्वा श्रुत्वा च सम्भ्रान्ता हतशेषा निशाचराः।
राक्षस्यश्च समागम्य दीनाश्चिन्तापरिप्लुताः॥ **6.94.4** ॥

विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः।
राक्षस्यः सह सङ्गम्य दुःखार्ताः पर्यदेवयन्॥ **6.94.5** ॥

कथं शूर्पणखा वृद्धा कराला निर्णतोदरी।
आससाद वने रामं कन्दर्पसमरूपिणम्॥ **6.94.6** ॥

सुकुमारं महासत्त्वं सर्वभूतहिते रतम्।
तं दृष्ट्वा लोकवध्या सा हीनरूपा प्रकामिता॥ **6.94.7** ॥

कथं सर्वगुणैर्हीना गुणवन्तं महौजसम्।
सुमुखं दुर्मुखी रामं कामयामास राक्षसी ॥ **6.94.8** ॥

जनस्यास्याल्पभाग्यत्वाद् वलिनी श्वेतमूर्धजा।
अकार्यमपहास्यं च सर्वलोकविगर्हितम् ॥ **6.94.9** ॥

राक्षसानां विनाशाय दूषणस्य खरस्य च।
चकाराप्रतिरूपा सा राघवस्य प्रधर्षणम् ॥ **6.94.10** ॥

तन्निमित्तमिदं वैरं रावणेन कृतं महत्।
वधाय सीता साऽऽनीता दशग्रीवेण रक्षसा ॥ **6.94.11** ॥

न च सीतां दशग्रीवः प्राप्नोति जनकात्मजाम्।
बद्धं बलवता वैरमक्षयं राघवेण च ॥ **6.94.12** ॥

वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसम्।
हतमेकेन रामेण पर्याप्तं तन्निदर्शनम् ॥ **6.94.13** ॥

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्।
निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ **6.94.14** ॥

खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा।
शरैरादित्यसङ्काशैः पर्याप्तं तन्निदर्शनम् ॥ **6.94.15** ॥

हतो योजनबाहुश्च कबन्धो रुधिराशनः।
क्रोधान्नादं नदन् सोऽथ पर्याप्तं तन्निदर्शनम् ॥ **6.94.16** ॥

जघान बलिनं रामः सहस्रनयनात्मजम्।
वालिनं मेरुसङ्काशं पर्याप्तं तन्निदर्शनम् ॥ **6.94.17** ॥

ऋष्यमूके वसंश्चैव दीनो भग्नमनोरथः।
सुग्रीवः प्रापितो राज्यं पर्याप्तं तन्निदर्शनम् ॥ **6.94.18** ॥

धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितम्।
युक्तं विभीषणेनोक्तं मोहात् तस्य न रोचते॥ **6.94.19** ॥

विभीषणवचः कुर्याद् यदि स्म धनदानुजः।
श्मशानभूता दुःखार्ता नेयं लङ्का भविष्यति॥ **6.94.20** ॥

कुम्भकर्णं हतं श्रुत्वा राघवेण महाबलम्।
अतिकायं च दुर्मर्षं लक्ष्मणेन हतं तदा।
प्रियं चेन्द्रजितं पुत्रं रावणो नावबुध्यते॥ **6.94.21** ॥

मम पुत्रो मम भ्राता मम भर्ता रणे हतः।
इत्येष श्रूयते शब्दो राक्षसीनां कुले कुले॥ **6.94.22** ॥

रथाश्वनागाश्च हतास्तत्र तत्र सहस्रशः।
रणे रामेण शूरेण हताश्चापि पदातयः॥ **6.94.23** ॥

रुद्रो वा यदि वा विष्णुर्महेन्द्रो वा शतक्रतुः।
हन्ति नो रामरूपेण यदि वा स्वयमन्तकः॥ **6.94.24** ॥

हतप्रवीरा रामेण निराशा जीविते वयम्।
अपश्यन्त्यो भयस्यान्तमनाथा विलपामहे॥ **6.94.25** ॥

रामहस्ताद् दशग्रीवः शूरो दत्तमहावरः।
इदं भयं महाघोरं समुत्पन्नं न बुद्ध्यते॥ **6.94.26** ॥

तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः।
उपसृष्टं परित्रातुं शक्ता रामेण संयुगे॥ **6.94.27** ॥

उत्पाताश्चापि दृश्यन्ते रावणस्य रणे रणे।
कथयन्ति हि रामेण रावणस्य निबर्हणम्॥ **6.94.28** ॥

पितामहेन प्रीतेन देवदानवराक्षसैः।
रावणस्याभयं दत्तं मनुष्येभ्यो न याचितम्॥ **6.94.29** ॥

तदिदं मानुषं मन्ये प्राप्तं निःसंशयं भयम्।
जीवितान्तकरं घोरं रक्षसां रावणस्य च॥ **6.94.30** ॥

पीड्यमानास्तु बलिना वरदानेन रक्षसा।
दीप्तैस्तपोभिर्विबुधाः पितामहमपूजयन्॥ **6.94.31** ॥

देवतानां हितार्थाय महात्मा वै पितामहः।
उवाच देवतास्तुष्ट इदं सर्वा महद्वचः॥ **6.94.32** ॥

अद्यप्रभृति लोकांस्त्रीन् सर्वे दानवराक्षसाः।
भयेन प्रभृता नित्यं विचरिष्यन्ति शाश्वतम्॥ **6.94.33** ॥

दैवतैस्तु समागम्य सर्वैश्चेन्द्रपुरोगमैः।
वृषध्वजस्त्रिपुरहा महादेवः प्रतोषितः॥ **6.94.34** ॥

प्रसन्नस्तु महादेवो देवानेतद् वचोऽब्रवीत्।
उत्पत्स्यति हितार्थं वो नारी रक्षःक्षयावहा॥ **6.94.35** ॥

एषा देवैः प्रयुक्ता तु क्षुद् यथा दानवान् पुरा।
भक्षयिष्यति नः सर्वान् राक्षसघ्नी सरावणान्॥ **6.94.36** ॥

रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः।
अयं निष्टानको घोरः शोकेन समभिप्लुतः॥ **6.94.37** ॥

तं न पश्यामहे लोके यो नः शरणदो भवेत्।
राघवेणोपसृष्टानां कालेनेव युगक्षये॥ **6.94.38** ॥

नास्ति नः शरणं किञ्चिद् भये महति तिष्ठताम्।
दावाग्निवेष्टितानां हि करेणूनां यथा वने॥ **6.94.39** ॥

प्राप्तकालं कृतं तेन पौलस्त्येन महात्मना।
यत एव भयं दृष्टं तमेव शरणं गतः॥ **6.94.40** ॥

इतीव सर्वा रजनीचरस्त्रियः
    परस्परं सम्परिरभ्य बाहुभिः।
विषेदुरार्तातिभयाभिपीडिता
    विनेदुरुच्चैश्च तदा सुदारुणम्॥ **6.94.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्नवतितमः सर्गः॥